समस्तेषु निरवयवेषु प्रपंचात्मकेषु सद्भावमनानुस्यूतमनुगतमेकं समस्तानि वस्तूनि प्रपंचात्मकानि यत्स्वरूपं न स्पृशंति कुतो वियदाकाशमिव सदा सर्वदा शुद्धं निर्मलं स्वरूपं अच्छस्वरूपं अमूर्तं स्वरूपं यत् एकमेव परं ब्रह्म यः सोहमात्मेति। कथमेकस्य सर्वव्यापित्वं दृष्टं ततः श्रुतिः एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति श्रुत्या सर्वव्यापित्वं दर्शितम्॥ ११॥ ॥

हं॰ ३

समस्तेषु वस्तुष्वनुस्यूतमेकं समस्तानि वस्तूनि यन्न स्पृशंति
वियद्वत्सदा शुद्धमच्छस्वरूपं स नित्योपलब्धिस्वरूपोहमात्मा ११
उपाधौ यथा भेदता सन्मणीनां तथा भेदता बुद्धिभेदेषु तेपि
यथा चंद्रकाणां जले चंचलत्वं तथा चंचलत्वं तवापीह विष्णो १२

व्युत्पादितमर्थमुपसंहरति॥ उपाधौ सतीति यथा भेदता सन्मणीनां स्फटिकादीनां लोहितकृष्णादिभेदेन तथा भेदता बुद्धिगते निजमात्मनि। सोहमात्मा परमात्मा तस्य भेदो नास्ति बुद्धिकृत इत्यर्थः॥ यथा चंद्रिकाणां चंद्र एव चंद्रकाः स्वार्थे कः अ
निले हर्षे मारुताभ्यां जलस्य चंचलत्वात् तदाभासमपि चंचलत्वं तथा बुद्धीनां चंचलत्वात् तवापि चंचलत्वमौपाधिकं न पार नाम ३
मार्थिकमित्यर्थः॥ इह बुद्धिगुहे विशेषो ॥ १२॥ इति हस्तामलके सटीकाख्यं संपूर्णमगमत्॥ श्रीराम॥ संवत् १८..॥ पौ॰ व॰ ति॰ १०॥ गुरु

ननु कथमेक एव आत्मा युगपदनेकां बुद्धिमधितिष्ठति न ह्येक एव बालको युगपदनेकानश्वानधितिष्ठन्नुपलभ्यते क्रमेणाधिष्ठानं युक्तं तत्र
ह नास्ति युगपत्सर्वासां बुद्धीनां स्वव्यापारे प्रवृत्तिदर्शनात् अधिष्ठातृत्वं च प्रभुत्वाभावादतो नैक आत्मा अत आह ७ यथा येन प्रकारेण रविरादित्य
एक एवानेकानां चक्षुषां प्रकाशो युगपदेक एवानेकचक्षुष्यधितिष्ठति न च क्रमेणैकैकस्मिंश्चक्षुषि प्रकाश्यं प्रकाशीकरोति तथा तेनैव प्रकारेण एकः
सो प्रबोधस्तथैक प्रबोधः ईश्वरः अनेका धियो बुद्धयो युगपदधितिष्ठति न क्रमेणैकैकस्मिन्धियि प्रकाश्यं प्रकाशीकरोति सोहमात्मेति संबंधः
न त्वस्तु तर्हि रविरेवानेकबुद्धीनामधिष्ठाता किमात्मा सूयतेनेति तथा च श्रुतिः ॥ धियो यो नः प्रचोदयात् प्रेरयतीत्यत आह ७ विवस्वतादिसे
तं न प्रभासं प्रकाशितं अक्षं चक्षुर्यथा रूपं घटादि प्रगृह्णाति प्रकर्षेण जानाति नाभातं न प्रकाशितं अंधकारे घटाद्यनुपलंभात् एवं सति विवस्वानप्येकः
न यातेनैव प्रकारेण जानाति भातं प्रकाशितं अपि तु धिः सन् आभासयति अधितिष्ठति अस्य वस्तु यद्यपि विवस्वतो अधिष्ठाता सोहमात्मेति स
स च सर्वेषां भूतानामधिष्ठाता तुल्यं तु चक्षुरधिष्ठानमभिप्रेत्य एक एव विवस्वतो बुद्धिरेकत्वमभिहितं यस्माद्विवस्वदादिषि तथा बुद्धिमु
दयति ननु तर्हि प्राक्तनेन अधिष्ठातृत्वं आत्मनः तस्य प्रकाशकत्वात्मेव नान्योतोस्ति द्रष्टेति श्रुत्या ब्रह्मणः तं प्रतिबिंब्यते किं च ८ ।

यथानेकचक्षुःप्रकाशो रविर्न क्रमेण प्रकाशीकरोति प्रकाश्यम् ॥ अनेका धियो यस्तथैकप्रबोधः स नित्योपलब्धिस्वरूपोहमात्मा ॥ ७
विवस्वत्प्रभातं यथा रूपमक्षं प्रगृह्णाति नाभातमेवं विवस्वान् ॥ तथाभात आभासयत्यक्षमेकः स नित्योपलब्धिस्वरूपोहमात्मा ८
यथा सूर्य एकोऽप्स्वनेकश्चलासु [illegible] स्वनन्यद्विभाव्यस्वरूपः चलासु प्रभिन्नासु धीष्वेक एव स नित्योपलब्धिस्वरूपोहमात्मा ९
घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा निष्प्रभं मन्यते चातिमूढः तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोहमात्मा १०

यथा येन प्रकारेण आदित्य एकः अप्सु वारिषु चलासु स्थिरासु च प्रमनेकोपि नानापि सन् अनन्यविभाव्यस्वरूपं अनुगच्छति
अनुगच्छति स न नच्छ कश्चनेनैकेन विभाव्यस्वरूपं यस्य स तथोक्तः न वारिषु स्थिरस्थितो भवति किं तर्हि तथैव च नभसि देदीप्यमानं मा
तवारिषु स्फुरत्सु इत्यर्थः ॥ एवमेक आत्मा चलासु प्रभिन्नासु नानासु धीषु अनेकः सन् अनन्यविभाव्यस्वरूपः ननु बुद्धिरनुगच्छति
किं तर्हि प्रयोगे वदेदीप्यते यः सोहमात्मेत्यर्थः ॥ ९ यथा येन प्रकारेण मेघेनाच्छन्ना तिरोहिता दृष्टिर्दर्शनं यस्य स घनच्छन्नदृष्टिः पुरु
षः घनेनाच्छन्नमर्कं मन्यते जानाति निःप्रभं प्रभारहितं अप्रकाशस्वरूपं इति यावत् ननु बाहि मन्यते घनच्छन्नदृष्टिर्वा
तत्प्रकाशस्वरूपमपि रविमप्रकाशमहं प्रपश्यामीति अतिमूढः अमूढं सचात्मानो दृष्टिविद्याविषयमेघच्छन्नस्वरूपमपि अप्र
काशमन्यते पादत्रयेण व्याख्याय तथा तेनैव प्रकारेण [illegible] मूढदृष्टेः बुद्धिमतो [illegible] कर्माद्यासक्तमात्मानं
मानो बद्धवद्भाति मूढदृष्टेः सोहमात्मेत्यर्थः ॥ १० ॥